20 MAY 1980 *

19

पि२५,
१००५

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव रसारत्नहार:
(लिखित पत्रे ८)
लेखक त्रिपाठी शिवराम

॥श्रीगणेशायनमः॥ श्रीशंवंदे॥ निरीक्ष्यपतिविष्णोश्चरणारविंदनखेषुलक्ष्मीः
प्रतिबिंबमस्मात्॥ दशावतारादपिमन्यमानास्वाधिक्यमास्ताद्विहि दुपांसुखाय॥
॥१॥ उद्ग्रथ्यतेसर्वविचक्षणानांप्रीत्यैषयायंरसरत्नहारः॥ गुणोरुपेतोखिल
लब्धवर्णकंठस्थितस्याद्धि— तोर्दिगंते॥२॥ स्यात्स्थायिभावोत्ररसोविभावै
स्तथानुभावैर्व्यभिचारिभिश्च॥ आरोप्यमाणःक्रमशःप्रकर्षंयथोचितैःसात्वि
कसंपतैश्च॥३॥ आलंबनोद्दीपनभिद्विभावोरसस्यहेतुःकथितोसुधीभिः॥
रसोपमालंब्यभवेत्प्रवृत्त आलंबनाख्यःसभवेद्विभावः॥४॥ तटस्थउद्दीपयते
रसंयउद्दीपनाख्योथभवेद्विभावः॥ रसस्यकार्यंह्यनुभावसंज्ञंज्ञेयाःसहायाव्य
भिचारिणाश्च॥५॥ शृंगारवीरकरुणाद्भुतहास्यभयानकाः॥ रौद्रबीभत्सशांता
ख्याकाव्येनवरसाःस्मृताः॥६॥ स्त्रीपुंसयोर्मिथोरागवृद्धिःशृंगारउच्यते॥ सं

१ भोगो विप्रलंभश्च स्येषस्याद्विविधो द्वयोः ॥ ७ ॥ संयुक्तयोस्स्यात्संभोगो विप्रलंभो वि
युक्तयोः ॥ अष्टधश्च दाकाशश्च पुनरेषद्विधामलः ॥ ८ ॥ स्त्रीपुंसाविति निर्देशाभ्या
विका वर्ण्यते पुरा ॥ स्वीयाच परकीयाच सामान्येति त्रिधा स्त्रियः ॥ ९ ॥ स्वकीयाचोत्त
माचारा पतिमात्रानुरागिणी ॥ मुग्धामध्याप्रगल्भेति त्रिधांकुरितयौवना ॥ १० ॥ ता
स्त्वाद्या सा द्विधाज्ञात यौवनाज्ञातयौवना ॥ नवोढा सेवसुरत प्रतिरोधकलज्जया ॥ ११ ॥
स्याद्विस्रब्धनवोढा च मानाकंमंदाक्षमाद्यतः ॥ ह्रीकाम साम्य मध्यास्याद्धैर्येसाग
सि नायके ॥ १२ ॥ वक्रोक्त्याद्वेपरीत्ये — भवेत्परुषवाग्रुषा ॥ प्रोढाच्यधिककंदर्पोपत्याव
खिलकेलिकृत् ॥ १३ ॥ एषाज्येष्ठा कनिष्ठेति द्विधास्नेहक्रमाजनं ॥ भर्तुर्यसा भवेज्ज्येष्ठा
कनिष्ठा तु मतोवरा ॥ १४ ॥ धीराधीरा तथाधीराधीरेति त्रिविधे स्त्रियो ॥ मध्याप्रगल्भिके
मानावस्थायामुदिते बुधैः ॥ १५ ॥ धीराधीरे क्रमाद्यंग्या व्यंग्यकोपप्रकाशिके ॥ १६ ॥ प्रिय १

सोत्प्रासवक्रोक्त्या माध्याधीराश्रवेद्रुषा ॥ १६ ॥ अधीरा परुषोक्त्या च धीराधीरानुरोद
नैः ॥ प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ॥ १७ ॥ उदास्ते सुरते सत्तत्र दर्शयन्त्या
दराद्बहिः ॥ धीराधीरा तु सोल्लुंठभाषणैः खेदयेद्ध्रुवं ॥ १८ ॥ तर्जयेत्ताडयेदेतदुक्तं साहि
त्यदर्पणे ॥ धीरादिभेदास्स्वीयाया इति प्राचीनलेखनं ॥ १९ ॥ नन्वेस्तु परकीयायां अपि ते
स्युरितीरितं ॥ स्वानूढा स्वानुरक्तास्त्री परकीया न गद्यते ॥ २० ॥ उत्तमावमभेदाभ्यां द्विविधा
द्विविधा मता ॥ अलक्षितानुरागैषा स्वीया कन्योत्तमा भवेत् ॥ २१ ॥ त्वङ्गिन्ना स्ववमास्से
या विदग्धा ब्रास्तु तद्विदाः ॥ २२ ॥ परोढा कन्यकाभे – द्विविधे चापरांगना ॥ चेष्टेषास्या
न प्रसिद्धोऽनुरागः कविभिस्स्मृतः ॥ २२ ॥ विदग्धा मुदिता चैषानुशयाना थ लक्षिता ॥ २३ ॥
गुप्त्या च कुलटा चेति षट् प्रकारोदिता बुधैः ॥ २४ ॥ विदग्धा वाक्क्रियाहेतु वैदग्ध्याभ्यां
द्विधैष्यते ॥ २४ ॥ भाविस्वामीष्टबोधेन प्रहृष्टा मुदितोच्यते ॥ नाशात्संकेत – नरुछस्यभा

२ चिनो भावशंकया॥ स्वहीनप्रिययातस्य बोधाश्वानुशया त्रिधा॥ २६॥ लक्षितासानुविज्ञेया
याजनैर्ज्ञातरागिका॥ यागोयापतिसागुप्ताफलंभाविभवज्ञतं॥ २७॥ कुलटाबहुपुंरागा वेश्या
देश्याप्रकाशतः॥ लोभेन सर्वपुंरागा सामान्याकथिताबुधैः २८॥ गर्विताचान्यसंयोगदुःखि
तामानिनी स्त्रियः॥ गर्विताद्विविधाहेत्वोः प्रेमसौंदर्ययोर्भिदा॥ २९॥ मानः कोपः सतुद्वेधा
प्रणयेर्ष्योसमुद्भवः॥ द्वयोः प्रणयमानस्यात्कोपोयः कारणं विना॥ ३०॥ पत्युरन्यप्रियासंगे दृ
ष्टेथ नुमिते श्रुते॥ ईर्ष्यामानो भवेस्त्रीणां तत्रत्वनुमितस्त्रिधा॥ ३१॥ तत्स्वप्नापित्तभोगां
क गोत्रस्खलनतो भवेत्॥ साम भेदोथदानंच नत्युपेक्षे रसांतरं॥ ३२॥ तद्भंगाय पतिः कुर्या
त्षडुपायानिमान्क्रमात्॥ तत्रप्रियवचः साम भेदः सख्युपरंजनं॥ ३३॥ दानं व्याजेनभूषा
देः पादयोः पतनं नतिः॥ सामादौतुपरिक्षीणेस्यादुपेक्षावधीरणं॥ ३४॥ रभसत्रासहर्षादेः २
कोपभ्रंशोरसांतरं॥ इतिमानविचारस्तुकृतः साहित्यदर्पणे॥ ३५॥ मानोलघुमध्यम

श्च गुरुश्चेति त्रिधा भवेत्॥ असाध्यस्तु रसाया सद्रतिभानुकृतोऽस्थितं॥ ३६॥ अर
स्त्रीदर्शनोत्थ — गोत्रस्खलनजस्तथा॥ अन्यस्त्रीसंगजनितः क्रमेण त्रिविधो भ
वेत्॥ विशेषा नायिकानां स्युः स्वाधीनपतिकादयः॥ अन्यत्र पोर्वोपयेत्त्तौ देतु
रुक्ता मनीषिभिः॥ ३८॥ स्वाधीनस्वात्पतिर्यस्याः स्वाधीनपतिका हि सा॥ सुर
ताचित्तवारज्ञा सुरतस्योपयोगिनी॥ ३९॥ सपाद्यति सा यस्त्री या सा वासक
सज्जिका॥ सोत्काध्यायति या भर्तुरनागमनकारणं॥ ४०॥
रथाँता र्थिनी तु संकेतं याति या साभिसारिका॥ विप्रलब्धा प्रियं तत्रादृष्ट्वा संता
पसंकुला॥ ४१॥ खंदितारतिचिह्नाढ्यो यस्या आयाति नायकः॥ कलहांतरिता
नत्ता याव मत्य प्रियं भवेत्॥ ४२॥ प्रवासिनी प्रियेतस्माज्ज्ञेया प्रोषितभर्तृका॥

२ प्रवत्स्यतिप्रीत्त — त्नाप्रनत्स्यत्यतिकाप्रवेत्॥४३॥कुर्वतोप्याहितंभर्तुर्हि
तंकुरुतेसमाहिसा॥हिताहितंपाचरतिप्रियवन्मध्यमाचसा॥४४॥कुर्व
त्यपिप्रियंपत्यानहितंकुरुतेधमा॥इतितास्त्रिविधाज्ञेयाःस्वभावप्रभ
वैर्गुणैः॥४५॥विश्वासपात्रंविश्रामकारिणीपर्श्वचारिणी॥सखीतस्याः
कर्मशिक्षाक्षेपोपात्रंप्रपूर्वकं॥परिहासश्चदंपत्योर्मिथःसख्याकृतस्त
था॥दूतव्यापारनिपुणादूतीसंयोगकारिणी॥४६॥वीरहादेवीपिकात्र
वर्णयेत्तनायकायतः॥पतिश्चोपपतिश्चैववैशिकश्चक्रमात्त्रयः॥४८
वोढापतिःसमलोरक्तोनित्यंवेश्यासुवैशिकः॥अन्योविटश्चोपपतिर्यःस्त्रीणामप्र २
योरत्तः॥४९॥रक्तोनुरक्तोनुकूलःसमःसर्वासुदक्षिणः॥धृष्टस्पष्टापराधोपिप्रि

यया।पिनिराकृतः॥५०॥ निर्लज्जोस्यांसमासक्तः शठस्त्रीकपटेपटुः॥ यथासंभव
मेतेषांभेदाज्ञेयामनीषिभिः॥५१॥ यानीच्चचतुरश्चोभौशठभेदौप्रकीर्तितौ॥ वा
कूवेष।व्यंग्यसंयोगनिपुणश्चतुरोमतः॥५२॥ तेषांत्वनर्मसचिवः पीठमर्दोवि
टस्तथा॥ चेटोविदूषकइतिचतुर्थोभानुनोदिता॥५३॥ पीठमर्दप्रकुपितःस्त्रीप्र
सादकउच्यते॥ विटःकामकलाभिज्ञः चेटःसंधानदक्षिणः॥५४॥ अंगवाग्वेषवैकृ
त्यहास्यकारीविदूषकः॥ आद्यानुरागमानीत्यप्रवासकरुणात्मकः॥५५॥ चतुर्धा
विप्रलंभस्यात्पूर्वःपूर्वोह्ययंगुरुः॥ नवावलोकाद्दंपत्योःकामवर्द्धितरागयोः॥५६॥
पूर्वानुरागोवित्तियोह्यपूर्णस्पृहयोर्द्दशे॥ मानप्रवासावुदितौपंश्चत्वेकरुणासयोः॥५७
एकस्यतत्रवृत्तस्यवर्णनंक्रियतेबुधैः॥ अथस्त्रीणामलंकारावर्ण्यंतेशास्त्रदर्शि
ताः॥५८॥ यौवनेसत्वजास्तासामष्टाविंशतिरीरिताः॥ अलंकारात्रैस्तेभावहाव

४ हेलास्त्रयोंगजाः॥५९॥शोभाकांतिश्चदीप्तिश्च माधुर्यंचप्रगल्भता॥ औदार्यंधैर्य
मित्येतेसप्तैवस्युरयत्नजाः॥६०॥लीलाविलासोविच्छित्तिर्बिब्बोकः किलकिंचितं॥मोट्टायि
तंकुट्टमितंविभ्रमोललितंमदः॥६१॥विहृतंतपनंमौग्ध्यंविक्षेपश्चकुतूहलं॥हसि
तंचकितंकेलिरित्यष्टादशसंख्यकाः॥६२॥स्वभावजास्तुभावाद्यादशपुंसांभवंत्यमी॥
भावोविकारश्चित्तस्य॥निर्विकल्पेयआदिमः॥६३॥नेत्रादिविकृतिर्व्यक्तोभावोहावो
रतीङ्गितः॥हेलात्यंतसमालक्ष्योहावएवोदितःक्रमात्॥६४॥रूपयौवनयोगाद्यैःशो
भास्यादंगभूषणं॥मन्मथोन्मेषणासैवविस्तीर्णाकांतिरुच्यते॥६५॥कांतिरेवा
तिप्रकाशादीप्तिरित्यभिधीयते॥सर्वावस्थाविशेषेषुमाधुर्यंरमणीयता॥६६॥
निःसाध्वसत्वंप्रागल्भ्यमौदार्यंविनयःसदा॥मुक्तात्मश्लाघनाधैर्यंमनोवृत्तिरचं ४
चला॥६७॥अंगैर्वेषैरलंकारैः प्रेमभिर्वचनैरपि॥प्रीतिप्रयोजितैर्लीलांप्रियस्य

नुकृतिंविदुः॥६८॥ यानस्थानासनादीनांमुखनेत्रादिकर्मणां॥ विशेषस्तु
विलासःस्यादिष्टसंदर्शनादिना॥६९॥ स्तोकमाल्यादिरचना विच्छित्तिःकांतिपोष
कृत्॥ बिंबोकस्त्वतिगर्वेणवस्तुनीष्टेप्यनादरः॥७०॥ क्रोधश्रमत्रासहासशुष्क
रोदनसंकरं॥ अभीष्टसंगजाद्धर्षादुदितंकिलकिंचितं॥७१॥ तद्भावभाविते चित्ते
वल्लभस्यकथादिषु॥ मोट्टायितमितिप्राहुः कर्णकंडूयनादिकं॥७२॥ केशस्तना
धरादीनांग्रहेहर्षेपिसंभ्रमात्॥ आहुःकुट्टमितंनेतिशिरःकरविधूननं॥७३॥ त्व
रयारागहर्षादेर्दयितागमनादिषु॥ अस्थानेभूषणादीनांविन्यासोविभ्रमोमतः॥
॥७४॥ सुकुमारतयांगानांविन्यासोललितंविदुः॥ मदोविकारःसौभाग्ययौवनाद्यव
लेपतः॥७५॥ वक्तव्यकालेप्यवचोव्रीडयाविहृतंमतं॥ तपनंप्रियविच्छेदेस्मरावेगो

५ ष्टितं॥७६॥अज्ञानादिवसंपृच्छ्य प्रतीतस्यापि वस्तुनः॥दयितस्य पुरः प्रोक्तं
क्तं मौग्ध्यं तत्तत्त्ववेदिभिः॥७७॥भूषणामर्धरचना वृथा विध्यगवेषणं॥रहस्या
ख्यानमीषच्च विस्मेरो प्यदयितांतिके॥७८॥रम्यवस्तु रमालोके लोलतास्या कुतूह
लं॥हसितं तु वृथाहासो यौवनोद्भेदसंभवः॥७९॥कुतोपि दयितस्याग्रे चकितं
भयसंभ्रमः॥विहारे सहकान्तेन क्रीडनं केलिरुच्यते॥८०॥निर्वेदो ग्लानिशंके
च मदो सूयाश्रमोपि च॥चिंतास्मृतिर्धृतिर्मोहो व्रीडालस्यं च दीनता॥८१॥चाप
ल्यं हर्ष आवेगो विषादो जडता तथा॥औत्सुक्य निद्रा गर्वाश्च वितर्कोपस्मृतिस्त
था॥८२॥सुप्तं विबोधो मर्षश्चाप्यवहित्थमथोग्रता॥व्याधिर्मतिस्तथोन्मादो म
रणं त्रास एव च॥स्तंभस्वेदोथ रोमांचः स्वरभंगोथ वेपथुः॥वैवर्ण्यमश्रुप्र ५
लया वित्यष्टौ सात्त्विका मताः॥८३॥प्रथमे त्वभिलाषस्याद्द्वितीये चिंतनं भवेत्॥

त्ती येतु स्मृतिः प्रोक्ता चतुर्थे गुणकीर्तनं॥ ८४॥ उद्वेगः पंचमः प्रोक्तो विलापः षष्ठउ
च्यते॥ उन्मादः सप्तमः प्रोक्तो भवे व्याधिस्तथाष्टमे॥ ८५॥ नवमे जडता प्रोक्ता दश
मे मरणं भवेत्॥ बृहत्समासा गौडी स्याद्रौद्रे वीरे ह्रसे रसे॥ ८६॥ द्वित्रिपदयुक् समा
सा वैदर्भी रीतिरारव्यता॥ शृंगारशांत करुणबीभत्सभयानकाद्भुतेयोज्या॥ ८७॥
उत्साहजो भवेद्वीर स्त्रेधा धर्मात्तिदानतः॥ श्लाघ्यैः सर्वैर्गुणैर्युक्तो नायकस्तत्र व
र्ण्यते॥ ८८॥ शोकजः करुणो ज्ञेयस्तत्र भूपातरोदनं॥ मोह वैस्वर्य निर्वेद प्रलापाश्च
पि वर्णयेत्॥ ८९॥ हासजन्मा समारव्यातो हास्यनामा रसो बुधैः॥ चेष्टांगवेषवैकृत्या
द्दृष्ट्वा हासस्य संभवः॥ ९०॥ विस्मयोद्भवोद्भुतो ज्ञेयः सा चासंभाव्य वस्तुनः॥ दर्श
नात्श्रवणाद्वापि देहिनामुपजायते॥ ९१॥ नेत्रप्रकाशपुलकः स्वेदो निष्पंद नेत्रता॥

६ अनुभावाअद्भुतस्यवाणास्यादत्रगद्गदा॥१२॥घोरवस्त्ववलोकेनभीतिर्जन्मा
भयानकः॥वनितानीचबालेषुबद्धुधावर्णयंत्यमुं॥१३॥दिग्दर्शनंचास्यशोषो
गद्गदागीश्चसंभ्रमः॥कंपस्त्रासश्चवैवर्ण्यंसंमोहोप्यत्रवर्ण्यते॥१४॥रौद्रःक्रो
धात्मकोरोषःकोपःपरपराभवात्॥भीष्मक्रियोभवेदुग्रःसामर्षस्तत्रनाय
कः॥१५॥भुजाघातःस्वप्रशंसाशस्त्रोत्क्षेपोथभ्रूकुटिः॥आक्षेपोदलनंशत्रो
र्वर्णयंतिकवीश्वराः॥१६॥जुगुप्सात्याच्यबीभत्सःस्यादहृद्यश्रुतीक्षणे॥नि
ष्ठीवनादिभंगादिमहत्तानात्रवर्ण्यते॥१७॥सम्यक्ज्ञानसमुद्भूतःशांतोनिः
स्पृहनायकः॥रागद्वेषपरित्यागात्सम्यक्ज्ञानसमुद्भवः॥१८॥क्रोधाह्
लादतयादीनाकुद्धादमभयान्विता॥जुगुप्सिताविस्मिताचशांतेतिरससंद ६

षयः॥९९॥जगतियद्यपिसंतिपरःशतागुरुतमारचनानुबुद्धये॥न
नुतथापिमयानन्तकथावृताऽगुरुतमारचनाऽबुधबुद्धये॥१००॥
गुरुपादांबुजद्वंद्वप्रसादावाप्तसन्मतिः॥त्रिपाठीशिवराख्योहारंहृरितवा
लयं॥१०१॥ इतित्रिपाठीशिवरामकृतोरसरत्नहारःसमाप्तः॥ ॥

८६१

१००५

।।रसरत्नहारः पत्रैं ६।।